# सुब्रह्मण्य भुजङ्ग स्तोत्रम्

सदा बालरूपाऽपि विघ्नाद्रिहन्त्री

महादन्तिवक्त्राऽपि पञ्चास्यमान्या ।

विधीन्द्रादिमृग्या गणेशाभिधा मे

विधत्तां श्रियं काऽपि कल्याणमूर्तिः ॥ १ ॥

न जानामि शब्दं न जानामि चार्थं

न जानामि पद्यं न जानामि गद्यम् ।

चिदेका षडास्या हृदि द्योतते मे

मुखान्निःसरन्ते गिरश्चापि चित्रम् ॥ 2 ॥

मयूराधिरूढं महावाक्यगूढं

मनोहारिदेहं महच्चित्तगेहम् ।

महीदेवदेवं महावेदभावं

महादेवबालं भजे लोकपालम् ॥ 3 ॥

यदा सन्निधानं गता मानवा मे

भवाम्भोधिपारं गतास्ते तदैव ।

इति व्यञ्जयन्सिन्धुतीरे य आस्ते

तमीडे पवित्रं पराशक्तिपुत्रम् ।। 4 ।।

यथाब्धेस्तरङ्गा लयं यान्ति तुङ्गा-

स्तथैवापदः सन्निधौ सेवतां मे ।

इतीवोर्मिपङ्क्तीर्नृणां दर्शयन्तं

सदा भावये हृत्सरोजे गुहं तम् ।। 5 ।।

गिरौ मन्निवासे नरा येऽधिरूढा-

स्तदा पर्वते राजते तेऽधिरूढाः ।

इतीव ब्रुवन्गन्धशैलाधिरूढः

स देवो मुदे मे सदा षण्मुखोऽस्तु ।। 6 ।।

महाम्भोधितीरे महापापचोरे
मुनीन्द्रानुकूले सुगन्धाख्यशैले ।
गुहायां वसन्तं स्वभासा लसन्तं
जनार्तिं हरन्तं श्रयामो गुहं तम् ।। 7 ।।

लसत्स्वर्णगेहे नृणां कामदोहे
सुमस्तोमसञ्छन्नमाणिक्यमञ्चे ।
समुद्यत्सहस्रार्कतुल्यप्रकाशं
सदा भावये कार्तिकेयं सुरेशम् ।। ८ ।।

रणथंसके मञ्जुलेऽत्यन्तशोणे
मनोहारिलावण्यपीयूषपूर्णे ।
मनःषट्पदो मे भवक्लेशतप्तः
सदा मोदतां स्कन्द ते पादपद्मे ।। ९ ।।

सुवर्णाभदिव्याम्बरैर्भासमानां

क्वणत्किङ्किणीमेखलाशोभमानाम् ।

लसद्धेमपट्टेन विद्योतमानं

कटिं भावये स्कन्द ते दीप्यमानाम् ।। 10।।

पुलिन्देशकन्याघनाभोगतुङ्ग-

स्तनालिङ्गनासक्तकाश्मीररागम् ।

नमस्याम्यहं तारकारे तवोरः

स्वभक्तावने सर्वदा सानुरागम् ।। 11 ।।

विधौ क्लृप्तदण्डान्स्वलीलाधृताण्डा-

न्निरस्तेभशुण्डान्द्विषत्कालदण्डान् ।

हतेन्द्रारिषण्डाञ्जगत्राणशौण्डा-

न्सदा ते प्रचण्डाञ्श्रये बाहुदण्डान् ।। 12 ।।

सदा शारदाः षण्मृगाङ्का यदि स्युः

समुद्यन्त एव स्थिताश्चेत्समन्तात् ।

सदा पूर्णबिम्बाः कलङ्कैश्च हीना-

स्तदा त्वन्मुखानां ब्रुवे स्कन्द साम्यम् ।। 13 ।।

स्फुरन्मन्दहासैः सहंसानि चञ्च-

त्कटाक्षावलीभृङ्गसङ्घोज्ज्वलानि ।

सुधास्यन्दिबिम्बाधराणीशसूनो

तवालोकये षण्मुखाम्भोरुहाणि ।। 14 ।।

विशालेषु कर्णान्तदीर्घेष्वजस्रं

दयास्यन्दिषु द्वादशस्वीक्षणेषु ।

मयीषत्कटाक्षः सकृत्पातितश्चे-

द्भवेत्ते दयाशील का नाम हानिः ।। 15 ।।

सुताङ्गोद्भवो मेऽसि जीवेति षड्धा

जपन्मन्त्रमीशो मुदा जिघ्रते यान् ।

जगद्भारभृद्भ्यो जगन्नाथ तेभ्यः

किरीटोज्ज्वलेभ्यो नमो मस्तकेभ्यः ।। 16 ।।

स्फुरद्रत्नकेयूरहाराभिराम-

श्चलत्कुण्डलश्रीलसद्गण्डभागः ।

कटौ पीतवासाः करे चारुशक्तिः

पुरस्तान्ममास्तां पुरारेस्तनूजः ।। 17 ।।

इहायाहि वत्सेति हस्तान्प्रसार्या-

ह्वयत्यादराच्छङ्करे मातुरङ्कात् ।

समुत्पत्य तातं श्रयन्तं कुमारं

हराश्लिष्टगात्रं भजे बालमूर्तिम् ।। 18 ।।

कुमारेशसूनो गुह स्कन्द सेना-

पते शक्तिपाणे मयूराधिरूढ ।

पुलिन्दात्मजाकान्त भक्तार्तिहारिन्

प्रभो तारकारे सदा रक्ष मां त्वम् ।। 19 ।।

प्रशान्तेन्द्रिये नष्टसञ्ज्ञे विचेष्टे

कफोद्गारिवक्त्रे भयोत्कम्पिगात्रे ।

प्रयाणोन्मुखे मय्यनाथे तदानीं

द्रुतं मे दयालो भवाग्रे गुह त्वम् ।। 20 ।।

कृतान्तस्य दूतेषु चण्डेषु कोपा-

द्दहच्छिन्द्धि भिन्द्धीति मां तर्जयत्सु ।

मयूरं समारुह्य मा भैरिति त्वं

पुरः शक्तिपाणिर्ममायाहि शीघ्रम् ।। 21 ।।

**प्रणम्यासकृत्पादयोस्ते पतित्वा**

**प्रसाद्य प्रभो प्रार्थयेऽनेकवारम् ।**

**न वक्तुं क्षमोऽहं तदानीं कृपाब्धे**

**न कार्यान्तकाले मनागप्युपेक्षा ॥ 22 ॥**

**सहस्राण्डभोक्ता त्वया शूरनामा**

**हतस्तारकः सिंहवक्त्रश्च दैत्यः ।**

**ममान्तर्हृदिस्थं मनःक्लेशमेकं**

**न हंसि प्रभो किं करोमि क्व यामि ॥ 23 ॥**

**अहं सर्वदा दुःखभारावसन्नो**

**भवान्दीनबन्धुस्त्वदन्यं न याचे ।**

**भवद्भक्तिरोधं सदा क्लृप्तबाधं**

**ममाधिं द्रुतं नाशयोमासुत त्वम् ॥ 24 ॥**

अपस्मारकुष्टक्षयार्शः प्रमेह-

ज्वरोन्मादगुल्मादिरोगा महान्तः ।

पिशाचाश्च सर्वे भवत्पत्रभूतिं

विलोक्य क्षणात्तारकारे द्रवन्ते ।। 25 ।।

दृशि स्कन्दमूर्तिः श्रुतौ स्कन्दकीर्ति-

र्मुखे मे पवित्रं सदा तच्चरित्रम् ।

करे तस्य कृत्यं वपुस्तस्य भृत्यं

गुहे सन्तु लीना ममाशेषभावाः ।। 26 ।।

मुनीनामुताहो नृणां भक्तिभाजा-

मभीष्टप्रदाः सन्ति सर्वत्र देवाः ।

नृणामन्त्यजानामपि स्वार्थदाने

गुहाद्देवमन्यं न जाने न जाने ।। 27 ।।

कलत्रं सुता बन्धुवर्गः पशुर्वा

नरो वाथ नारी गृहे ये मदीयाः ।

यजन्तो नमन्तः स्तुवन्तो भवन्तं

स्मरन्तश्च ते सन्तु सर्वे कुमार ।। 28 ।।

मृगाः पक्षिणो दंशका ये च दुष्टा-

स्तथा व्याधयो बाधका ये मदङ्गे ।

भवच्छक्तितीक्ष्णाग्रभिन्नाः सुदूरे

विनश्यन्तु ते चूर्णितक्रौञ्चशैल ।। 29 ।।

जनित्री पिता च स्वपुत्रापराधं

सहेते न किं देवसेनाधिनाथ ।

अहं चातिबालो भवान् लोकतातः

क्षमस्वापराधं समस्तं महेश ।। 30 ।।

नमः केकिने शक्तये चापि तुभ्यं

नमश्छाग तुभ्यं नमः कुक्कुटाय ।

नमः सिन्धवे सिन्धुदेशाय तुभ्यं

पुनः स्कन्दमूर्ते नमस्ते नमोऽस्तु ।। ३१ ।।

जयानन्दभूमं जयापारधामं

जयामोघकीर्ते जयानन्दमूर्ते ।

जयानन्दसिन्धो जयाशेषबन्धो

जय त्वं सदा मुक्तिदानेशसूनो ।। ३२ ।।

भुजङ्गाख्यवृत्तेन क्लृप्तं स्तवं यः

पठेद्भक्तियुक्तो गुहं सम्प्रणम्य ।

स पुत्रान्कलत्रं धनं दीर्घमायु-

र्लभेत्स्कन्दसायुज्यमन्ते नरः सः ।। ३३ ।।